# Shrimad VadirAja's Hitopadesha or Panchashloki

# શ્રીમદ્વાદિરાજસ્ય હિતોપદેશઃ અથવા પઞ્ચશ્લોકી

## Document Information

Text title : VadirAja's Hitopadesh or Panchashloki

File name : hitopadeshaHvAdirAja.itx

Category : vishhnu, panchaka, vAdirAja

Location : doc_vishhnu

Author : vAdirAja

Transliterated by : Prabha Maruvada pvmaruvada at gmail.com

Proofread by : Prabha Maruvada, NA

Latest update : April 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીમદ્વાદિરાજસ્ય હિતોપદેશઃ અથવા પઞ્ચશ્લોકી

સ્મર કૃષ્ણં ભજ હરિં નમ વિષ્ણું શ્રયાચ્યુતમ્ ।
ત્યજ કામં જહિ ક્રોધં જહિ મોહં ભવાલયમ્ ॥ ૧॥

શ‍ૃણુ શૌરિકથાઃ પુણ્યાઃ પશ્ય શ્રીપતિવિગ્રહમ્ ।
જિઘ્ર શ્રીપાદતુલસીમ્ સ્પૃશ વૈકુણ્ઠવલ્લભમ્ ॥ ૨॥

ભુઙ્ક્ષ્વ કેશવનૈવેદ્યં તિષ્ઠ માધવમન્દિરે ।
જપન્નારાયણમનું પઠ તન્નામમઙ્ગલમ્ ॥ ૩॥

પાહિ પ્રપન્નજનતાં બ્રૂહિ તથ્યં હિતં નૃણામ્ ।
દેહિ કાઙ્ક્ષિતં અર્થિભ્યોઃ યાહિ સજ્જનસઙ્ગતિમ્ ॥ ૪॥

કુરુ ભૂતદયાં નિત્યં ચર ધર્મમહર્નિશમ્ ।
જાનીહિ નિત્યમાત્માનં અવેહ્યન્યદ્ધિ નશ્વરમ્ ॥ ૫॥

પઞ્ચશ્લોકીમિમાં શશ્વત્ પઠ ધારય ચિન્તય ।
એતાવાન્ સર્વવેદાર્થઃ સમાસેન નિરૂપિતઃ ॥ ૬॥

"નાસ્તિ નારાયણસમં ન ભૂતં ન ભવિષ્યતિ ।
એતેન સત્યવાક્યેન સર્વાર્થાન્ સાધયામ્યહમ્" ॥ (મહાભારતમ્)

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતઃ
હિતોપદેશઃ સમ્પૂર્ણઃ ।

*Shrimad VadirAja's Hitopadesha or Panchashloki*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*